# असाधुशब्दप्रयोगविचारः

भवानीशङ्करभट्टराईः, विद्यावारिधिः[1]

**सारः**

*संस्कृतभाषानिबद्धा भाषिकाध्ययनपरम्परा मूलतो व्याकरणे केन्द्रिता दृश्यते । आचार्यः पाणिनिः, तत्पूर्ववर्त्तिन उत्तरवर्त्तिनोऽपि प्राय आचार्या शब्दसाधुत्वसम्पादनमेव मुख्यं लक्ष्यं मत्वा सूत्र-वार्त्तिक-महाभाष्याणि तद्व्याख्यानानि च रचितवन्तः, तेन माध्यमेन कोटीशः शब्दान् साधुः कृतवन्तस्तथापि वैदिकलौकिकवाङ्मयेषुः, काव्यशास्त्रादिषु, लोकव्यवहारे च तत्तृतीयांशाः शब्दा असाधुः प्रयुज्यन्ते । पाणिनेरुत्तरकालिकैर्वार्त्तिकैः, भाष्यवार्त्तिकैः, इष्टिभिः, श्लोकवार्त्तिकैः, फक्किकाभिः, निपातनतः, बाहुलकात्, समासान्तो विधिरनित्य इति वचनेन, आगमप्रमाणमनित्यमित्युक्त्वा तथाविधैरन्यैरपि बहुभिरुपायैः शब्द साधुत्वसम्पादनायानेके प्रयासाः कृताः, यथासम्भवमुपाया अवलम्बिताश्च, तथाप्यनेकेषां शब्दानामसाधुत्वाद्, व्याकरणशास्त्रस्य साधुत्वसम्पादन-प्रयासोऽव्याप्तः । शिष्टपरिज्ञानार्थाष्टाध्यायीति शिष्टानामाभणकं प्रमाणितञ्च । अतः साधुः प्रयोक्तव्यो नासाधुः, साधुभिः पुण्यमसाधुभिश्च पापमिति भेदात्मिकां बुद्धिं परित्यज्य देशकालपरिवेशानुकुलमाधुनिकशब्दग्रहणाय प्रयोगाय च लेखोऽयं परामृशति । आङ्ग्लप्रभृतयो समृद्धा भाषाः साध्वसाधून् लोकप्रचलितान् यथाकथञ्चिदपि शब्दान् गृह्णन्ति, तान् प्रयुञ्जते च अस्मादेव कारणात् द्विसहस्रवर्षस्येतिहासभूतेयंमाङ्लभाषा विश्वस्य सर्वसमृद्धा जाता, परं साधुशब्दप्रयोगगौरवं कुर्वती सत्यपि संस्कृतभाषा प्रतिदिनं सङ्कोचपदं गतवती । अधुना संस्कृतगौरवं नेपालीहिन्दीवङ्गमैथिलि-प्रभृतिभिस्तज्जन्याभिर्भाषाभिः प्रवर्द्धितमस्ति । तासु भाषास्वपाणिनीयतत्समरूपेण गतास्तत्र प्रयोगरूढभूताश्च कालीन-विश्राम-दृष्टिवान्-जागृतप्रभृतयो लक्ष्यशः शब्दाः, संरचनाश्च तास्ता भाषा यावद् जीविष्यन्ति तावत्पर्यन्तं संस्कृतमपि जीवयिष्यन्तीति निश्चितम् । किं तादृश्यः संरचनाः शब्दाँश्चापाणिनीया असाधवश्चेत्युक्त्वा त्यजामः ? यदि न शक्यते चेदाधुनिकाभिः प्रक्रियाभिरथवा उपायान्तरैस्तादृशीनां संचरनानां साधुत्वं विधेयमथवा साधुत्वासाधुत्वयुक्ता धारणैव त्यक्तव्योति लेखसारः ।*

***शब्दकुञ्जिः*** - असाधुशब्दः, पाणिनिः, वार्त्तिकम्, इष्टिः, शिष्टपरिज्ञानार्थाष्टाध्यायी ।

## १. विषयप्रवेशः

काव्यशास्त्रे, भाषावाङ्मये, लोकव्यवहारादौ च यत्र-तत्रासाधुशब्दाः प्रयुक्ता दरीदृश्यन्ते, तादृशाः शब्दाः प्रयोगानर्हा इति वैयाकरणा प्रतिदिनं व्याहरन्ति तथापि कवयो भाषाप्रयोक्तारश्च तादृशनियमं श्रावं श्रावमप्यात्मानं निरङ्कुशमुद्घोषयन्तो भाषानुशासनं जेघ्नीयन्ते । व्याकरणशास्त्रं भाषावाङ्मयतः शिष्ट परम्परातश्च परिनिष्ठितं रूपं निर्माय इदं प्रयोजयस्वेति लोकं निर्दिशति परं लोकस्तु जिह्वासारल्यमपेक्ष्यमाणो व्याकरणेन साधितं रूपं यथानुकुलं प्रयुङ्क्ते । एतावता भाषिकपरिवर्तनमायाता सता कति शब्दा मृताः, कति विकृतिरवाप्यन्तः, अवशिष्टाश्चेषत्परिवर्तनेन दृष्टाः । एतद्विधा शब्दा एवात्रासाधुशब्दत्वेन समुल्लिखिताः सन्ति । ते च वैयाकरणैरनेकधा प्रयोग-निवारिताः सन्तोऽपि प्रयुयुज्यन्ते लोके । किं ते प्रयोक्तुं शक्यन्ते न वा ? तेषां किमस्ति भाषिकवैशिष्टचमित्यादि निभालनं प्रस्तुतलेखस्योद्देश्यं तदेव महत्त्वञ्च ।

[1] उपप्राध्यापक, पिण्डेश्वरविद्यापीठ, धरान, नेपाल संस्कृत विश्वविद्यालय, Email: *dikshitbhattarai072@gmail.com*

**क) असाधुशब्दपरिचयः**

साध्यति निष्पादयति धर्मादिकमिति व्युत्पत्त्या साध धातोरुणादिक उण्प्रत्यये साधुशब्दः सिद्धयति । अस्य - उत्तमः, कुलीनः, सभ्यः, उपयुक्तः, सुन्दरः, उचितः, प्रयोगयोग्य, आर्य इत्यादयः पर्याया अर्थाश्च भवन्ति । कः साधुरित्यत्र गरुडपुराणकारः प्राह-

न प्रहृष्यति सम्माने नावमानेन कुप्यति ।

न क्रुद्धं पुरुषं ब्रूयादेतद्धि साधुलक्षणम् ॥ (गरुडपुराणं- ११३-४२)

एतेन लक्षणेनोपयुक्तो हि साधुरिति बुध्यते । न साधुरसाधुरिति व्युत्पत्त्याऽनुपयुक्तोऽसाधुः । व्याकरणे सूत्रवार्त्तिकादिभिः साधयितुमशक्योऽसाधुः । भाषाविदां मते तु लोके प्रयोगायाऽयोग्यः, अश्लील-परुष-गर्ह्यग्राम्यादिदोषयुक्तः शब्दो ह्यसाधुः । साध्वसाधू च लक्षयन् शेखरकारो नागेशश्चैकत्र प्राह- साधुत्वञ्च व्याकरणान्वाख्येयत्वं पुण्यजनकतावच्छेदकधर्मवत्त्वं वा, तद्भिन्नत्वमसाधुत्वमिति (नागेशः, १९९८ : ४५) आचार्यस्य नागेशस्येतेन लक्षणेन साधुशब्दानां कृते शब्दशास्त्रीयव्युत्पादनमार्गेणानुसन्धेयत्वं शिष्टपरम्परातो रूढीभूय पुण्यजनकतायां कारणीभूतमर्हत्वं वाऽपेक्ष्यते । तादृशयोग्यताभिन्नाः सर्वेऽसाधव इति नागेशस्याशयः । वैदिकवाङ्मये- क्षेत्रस्य पतिना वयमित्यत्रासमस्तेऽपि पतिनापदप्रयोगः, दाति प्रियाणि चिद्वसु इत्यत्र जौहादिकस्य दाधातोर्योगेऽपि द्वित्वाभावः, तमसो गा अदुक्षत् इत्यत्र च भष्भावेन दुहेर्धकारे प्राप्तेऽपि बाहुलकाद् दकार एव, तथैव भद्रं कर्णेभिरित्यत्राकारान्तात् कर्णशब्दादैसादेशे प्राप्तेऽपि तस्याविधानं सर्वमप्यसाधुत्वम् । एतादृशेषु प्रयोगायोग्येषु सहस्रशो वैदिकरूपेषु आचार्यैर्बहुलं छन्दसि (पा.सू.२-४-३९) इति सूत्रेण, सर्वे विधयच्छन्दसि वैकल्पिका इति नियमेन, व्यत्ययविधिनोपायान्तरेण वा प्रयोगसाधुता साधिता वर्तते । लोकेऽपि- विश्रामः, समकालीनः, पूर्वीयः, पुराणम्, ब्राह्मणः, हार्दिकः, मयूरः, घटीयः, विश्लेषितः, शैक्षणिकः, देवाभिः, उलूखलम्, श्मशानम्, पिशाचः, कुञ्जरः प्रभृतयोऽनेकेऽसाधुशब्दाः प्रयुज्यन्ते । लोकोऽयं एतेषु कः साधुः कश्चासाधुरिति न पृच्छति, व्यवहारसञ्चार एव तस्योद्देश्यम् । परं व्याकरणशस्त्रन्तु परिनिष्ठितं रूपमेवापेक्षते, अत एते शब्दा व्याकरणशास्त्रदृष्टयाऽसाधवो मन्तव्याः ।

अत्र साधुत्वस्य मापकं पाणिनीयव्याकरणम् । अतः पाणिनीयव्याकरणेन निर्दिष्टनियमतो बहिर्भूता अपाणिनीयशब्दाः, संस्कृतभाषातोऽपभ्रंशभूताः, प्राकृताः, ईषत्परिवर्तिता, यथा- गौरित्यस्माद् गावी-गोणी-गोपोतलिकागाईप्रभृतिषु रूपान्तरिताः सर्वेऽप्यसाधुत्वेनात्र सङ्केतिताः सन्ति ।

**ख) असाधुशब्दप्रयोगे वैयाकरणमतम्**

असाधौ शक्तिरस्ति न वा, तादृशशब्दाः प्रयोक्तुं शक्यन्ते न वेति सन्देहे नैयायिकाः, वैयाकरणाश्च परस्परं विभजन्ते । तत्र नैयायिका अपभ्रंशीभूतेऽसाधावर्थबोधशक्तिर्नास्ति गावी-गोणी-गाईप्रभृतिष्वप-भ्रंशेषूच्चरितेषु गौरित्यस्य साधोः स्मरणेन तेभ्योऽर्थबोधो जायत इति कथयन्ति चेन्नागेशादयो नवीनवैयाकरणास्त्वसाधावपि बोधसामर्थ्यमङ्गीकुर्वन्ति । अन्यथा अपठितां साधुशब्दप्रयोगाक्षमानां बालादीनां कथमर्थबोधः स्यादित्याशङ्क्य द्वयोरेव शक्तिः स्वीकर्तव्य इत्याहुः । अत्र नागेशः प्राह- सा च शक्तिः साधुष्विवापभ्रंशेष्वपि शक्तिग्राहकशिरोमणेर्व्यवहारस्य तुल्यत्वात्, ...अत एव बालानां तिरश्चां चान्वयबोधः (नागेशः, १९९८ : ४१) साधुशब्दे द्विविधा शक्तिरस्तीति संस्कृतवैयाकरणाः । एकाऽर्थबोधिनी, अपरा च पुण्यप्रदायिनी । अत एव- एकः शब्दः सम्यग् ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामधुग् भवतीति महाभाष्यकारः प्राह । शुद्धोच्चरितेनैकेनापि शब्देन लोके भाषिकसम्प्रेषणं चलतीति आगच्छ, गच्छ, देहिप्रभृतिपदबोध्येन भावेन ज्ञायते । साधुशब्देन भावबोधस्तु जायत एव, शुद्धोच्चारणेनालौकिकं पुण्यमपि तस्मात् प्राप्यत इति द्विविधो लाभः । महाभाष्यकारोऽस्मिन् विषये प्राह- समानायामर्थायामवगतौ शब्दैश्चापशब्दैश्च शास्त्रेण धर्मनियम क्रियत

इति । इमं लाभमेव दृष्ट्वा भूषणकारोऽपि प्राह- वाचकत्वाविशेषेऽपि नियमः पुण्यपापयोरिति । एतेन कथनेनाप्यर्थबोधसामर्थ्यं द्वयोरेवास्तीति निश्चीयते । यदि तादृशशब्देष्वर्थबोधसामर्थ्यमस्ति चेत् ते प्रयोगयोग्याः सञ्जाताः । तथापि वैयाकरणाः किमर्थं तेषां प्रयोगनिवारणं कुर्वन्तीत्यस्मिन् लेखे विचार्यते ।

## २. समस्या

वैदिकवाङ्मये आर्षप्रयोगत्वेन, काव्येषु छन्दोऽलङ्कारादीनां संयोजनोपायत्वेन, भाषा व्यवहारे मुखसुखोपायेन शिष्टपरम्परानुरोधेन च, लोके रूढत्वेन यदृच्छाशब्दरूपेण वा बहुत्रासाधुशब्दाः प्रयुक्ता दृश्यन्ते । तादृशानामसाधुशब्दानां प्रयोगावस्था कीदृश्यस्तीति पर्यालोचनं आवश्यकम् । अतः साऽत्रत्या प्रथमा समस्या । तथैव वैयाकरणैर्वृद्धैश्च नापभाषितवै इत्युक्त्वा वारंवारमसाधुशब्दप्रयोगं निवारयताऽपि प्रयोगपथमायातानामसाधुशब्दानां किमस्ति मूल्यं ? ते युक्ता वाऽयुक्ता इति विश्लेषणमप्यत्रावश्यकमिति द्वितीया समस्या । प्रस्तुते लेख उपर्युक्तं समस्याद्वयं प्रस्तुतमस्ति, तद्यथा-

क) भाषावाङ्मयेऽसाधुशब्दप्रयोगस्थितिः कीदृशी ?

ख) असाधुशब्दप्रयोगो युक्तोऽयुक्तो वा ?

अतो लेखोऽयमुपर्युक्तयोः समस्ययोः समाधानाय कृतप्रयत्नो विद्यते ।

## ३. उद्देश्यम्

ऋग्यजुप्रभृतिषु वेदेषु, वाल्मीकीये रामायणे, वेदव्यासरचितेषु पुराणेषु, वेदव्यासस्यैव महाभारते, कालिदासादीनां काव्येषु संस्कृतवाङ्मयसम्बद्धेषु नैकेषु ग्रन्थेषु लौकिकव्यवहारे च संस्कृतभाषातोऽपभ्रष्टा, विकृताः, प्राकृतत्वमाप्ता असाधुशब्दाः यत्रतत्र प्रयुक्ता दरीदृश्यन्ते । कतिपये प्राच्योदीच्यादिदेशभेदतः केचन वैदिकपौराणिकलौकिकादिकालभेदतः कति च स्थानोच्चारणादिभेदतश्चापभ्रंशीभूता दृश्यन्ते । तान् परिगणय्य याथातथ्यविश्लेषणमावश्यकम् । यद्यपि लघुकलेवरके प्रकृते लेखे तदसम्भवमेव तथापि संस्कृते प्रयुज्यमानानामसाधुशब्दानां स्थालीपुलाकन्यायेन निभालनमत्र भविष्यति । तथैव लैकिके समाजे वाङ्मये चासाधुशब्दप्रयोगस्य युक्तायुक्तत्वपरीक्षणमत्र क्रियते । अतोऽत्रोद्देश्यद्वयं निर्धारितमस्ति, यथा-

क) भाषा वाङ्मये च प्रयुज्यमानानामसाधुशब्दानां निभालनम् ।

ख) असाधुशब्दप्रयोगस्य युक्तायुक्तत्वपरीक्षणम् ।

लेखोऽयमुपर्युक्त उद्देश्यद्वये केन्द्रितो भविष्यति ।

## ४. पूर्वाध्ययनसमीक्षणम्

वैदिकवाङ्मयनिबद्धं लौकिकवाङ्मयसम्बद्धमाऽऽपातत प्रयुक्तं वाऽपशब्दमधिकृत्याद्यावधि कोऽपि संस्कृतशोधः, अनुसन्धानप्रबन्धः, ग्रन्थः, पुस्तकं वा प्रकाशितं न दृष्टं श्रुतञ्च । प्रायः संस्कृतज्ञा वैदिकान साधुशब्दानार्षप्रयोग इत्युक्त्वा, अपाणिनीयान् कतिचिच्छब्दान् पृषोदरादीनि साधूनि इत्युक्त्वा, कतिशब्दाँस्तु बाहुलकेन साधयित्वा, काँश्चित्तु निपातनतः सिद्धिं विधाय, कतिचित् शब्दान् वार्तिकपरिभाषा फक्किकादिभिः साधुत्वं कारयित्वाऽपि प्रक्रियां सञ्चालयन्ति । तथैव क्वचित् समासान्तो विधिरनित्य इत्युक्त्वा, क्वचिदागमप्रमाणमनित्यमित्युक्त्वा, कुत्रचिच्च तदशिष्यं संज्ञाप्रमाणत्वादित्यभिधायापि साधुत्वं निदर्शयन्ति । पाणिनीयपरम्परायां शब्दसाधुकरणस्यैतादृशीसु नैकासु प्रक्रियासु विद्यमानास्वपि, पाणिनीयव्याकरणेन वैदिकानां लौकिकानाञ्च कोट्यधिकानां शब्दानां साधुत्वे कृतेऽपि तत्तृतीयांशा उणादयोऽपाणिनीया असाधवश्च शब्दा भाषावाङ्मये व्यवह्रियन्ते लोकव्यवहारेऽधुनापि प्रयुज्यन्त इत्यनुमीयते । संस्कृते भाषिकाध्ययनपरम्परा न प्राप्यते,

शब्दनिर्वचनमूलां, शब्दसाधुत्वान्वाख्यानां, शब्दार्थयोः सम्बन्धनिदर्शिकां पद्धतिमेव कतिपये विद्वान्सो भाषिकमध्ययनमामनन्ति । भाषाविज्ञानन्तु भाषां लक्षयत् तस्या वैशिष्ट्यानि निदर्शयत् भाषिकपरिवर्तनं, परिवर्तने कारणञ्च समुल्लिखत्, भाषाया उत्पत्तिः कथमभूत् ? भाषा कथं प्रसरति ? कथं देशभेदतो भिद्यते ? भाषायां ध्वनिवर्णादीनां परिवर्तनं कथं जायते ? इत्यादीन् विषयान् प्रकाशयति । एतदपेक्षया व्याकरणं तु भाषाणां सिद्धं स्वरूपमेवावबोधयति । सारतः कथिते भाषाविज्ञानस्याङ्गभूतं व्याकरणशास्त्रमिति मन्तव्यम् । अतो यः कोऽपि विषयो भाषिकदृष्ट्या पर्यालोच्यत उत व्याकरणदृष्ट्या इति विचारणीयम् । प्रस्तुतमध्ययनं भाषिकमित्यप्यत्रावधेयम् ।

जीविता भाषा गतिशीला भवतीति जानन्त्येव विबुधाः । यद्यपि संस्कृतभाषाऽधुना वाग्व्यवहारे प्रायो न प्रयुज्यते तथापि नेपालीहिन्दीमैथिलीभोजपुरीमराठीवङ्गाऽऽसामियाप्रभृतिषु पञ्चाशदधिकासु भाषास्वियमप्रत्यक्षतो जीविताऽस्तीति तास्ता भाषा यावन्त्यो जीविष्यन्ति तावन्त्य एषापि जीविष्यतीति निश्चप्रचम् । गतिशीलायां भाषायां समये समये ध्वनि-स्वरूपार्थादिषु परिवर्तनानि दृश्यन्ते, संस्कृतेऽप्येतद् विधानि बहूनि गतिशीलताबोधकानि सङ्केतानि प्राप्यन्ते, अत एषापि परिवर्तनशीला भाषेति वक्तुं शक्यम् । भाषाविज्ञानस्य रूपरेखानामके ग्रन्थे प्राध्यापकः टंकन्यौपाने लिखति- प्राचीनकाले प्रायो युरोपदेशीयानां भाषाणां व्याकरणं ल्याटिनग्रीकव्याकरणतः प्रभाविता भवन्ति स्म, नेपालीहिन्दीमैथिलीप्रभृतीनां भाषाणां व्याकरणमपि संस्कृतव्याकरण आश्रितो भवति स्म परमधुना समयः परिवर्तितः, भाषिकसंरचनाऽपि परिवर्तितेति संस्कृताश्रितानां भाषाणां व्याकरणान्यपि मौलिकानि जातानि । अत्र भाषिकपरिवर्तनमेव कारणम् (न्यौपाने, २०५१ : १६)

प्रस्तुतलेखोऽसाधुशब्दानां प्रयोग उपयुक्तो नवेति विचारे केन्द्रितः, अतो भाषा गतिशीला भवतीति सिद्धान्तोऽस्य विषयविश्लेषणाधारः । अस्मात् कारणाद् भाषा गतिशीला भवतीति विषये पूर्वव्याख्यातृभिः प्रस्तुतं सिद्धान्तं प्रथमतः प्रस्तुत्य तदन्वसाधुशब्दप्रयोगविषये पूर्वव्याख्यातृभिरुपस्थापिता धारणा, तैः स्थाने स्थाने प्रयुक्तान्युदाहरणानि चात्र समुद्ध्रियन्ते ।

४.१ आचार्यपाणिनिरष्टाध्याय्याः एङ् प्राचां देशे (पा.सू.१-१-७५) इति सूत्रे प्राचां देशाभिधाने एणिपचनीयः, भोजकटीयः, गोनर्दीयप्रभृतीनां पदानां वृद्धसंज्ञां विधाय प्राच्येतरे कान्यकुब्जादौ तद् निषिधति । तथैव उदीचां वृद्धादगोत्रात् (पा.सू.४-१-१५७) इति सूत्रेऽपि उदीच्यभेदं सङ्केतयतीति तदानीं लौकिके संस्कृते प्राच्योदीच्यादयो भेदाः स्वीकृता आसन्निति ज्ञायते । एतेन तात्कालिकी संस्कृतभाषा स्थानभेदयुक्ता आसीदिति निश्चीयते ।

**४.२ आचार्यपाणिनि**रष्टाध्याय्याः इको यणचि (पा.सू.६-१-७७) इति सूत्रे सुध्युपास्यः/सुद्ध्युपास्यः/ सुध्य्युपास्यः/सुद्ध्य्युपास्यः इति चत्वारि वैकल्पिकानि रूपाणि दर्शयन् तेषां प्रयोगसाधुत्वमुपदिशति । अतस्तात्कालिके संस्कृतेऽपि स्थानीयभेदा आसन्निति ज्ञायते ।

**४.३ पतञ्जलिः** (व्याकरणमहाभाष्यकारः) स्वकीये व्याकरणमहाभाष्येऽपभ्रंशप्रयोगनिषेधं शास्ति, एवं- तेऽसुरा हेलयो हेलय इति कुर्वन्तः पराबभूवुः, तस्माद् ब्राह्मणेन न म्लेच्छितवै, नापभाषितवै, म्लेच्छो ह वा एष यदपशब्दः । महाभाष्यकारस्येतत् कथनमपि प्रकृतेऽध्ययने स्रोतः ।

**४.४ भर्तृहरिः** (वाक्यपदीयकारः) संस्कारहीनं शब्दमसाधुरिति परिभाषते, यथा-

शब्दसंस्कारहीनो यो गौरिति प्रयुयुक्षिते ।
तमपभ्रंशमिच्छन्ति विशिष्टार्थनिवेशिनम् ॥ (भर्तृहरिः, १९९० : १३८)

पुनश्च स अपभ्रंशा शब्दा वाचका न भवन्तीति समुल्लिखति, यथा-

न शिष्टैरनुगम्यन्ते पर्याया इव साधवः ।

ते यतः स्मृतिशास्त्रेण तस्मात् साक्षादवाचकाः ॥ (भर्तृहरिः, १९९० : १४१)

वाक्यपदीयकारस्येता धारणा अपि प्रस्तुतेऽध्ययने आधाराः ।

**४.५ रामाधीनचतुर्वेदी** (भाषाविद्) स्वकीये संस्कृतभाषाविज्ञानम् नामके पुस्तके प्राह - अयं च भाषया प्रचलितो व्यवहारप्रवाहो गतानुगतिकः । यथा कश्चिद् गृहीतशक्तिकोऽस्माच्छब्दादयमर्थो बोध्य इति वृत्तिको वृद्धः गृहीतशक्तिकमन्यं युवानमादिशति-घटमानय इति । स सत्वरं घटमानयति, तथा कुर्वन्तं तं पुनः स आदिशति, घटमत्र स्थापय, पटमानय इति स तथा करोति । एतत्सर्वं तत्रस्थः कश्चिद् बालः पश्यति, एवमन्वयव्यतिरेकाभ्यां च घट इत्यस्य कम्बुग्रीवादिमानर्थः इति बुध्यते,... शवतिर्गतिकर्मा कम्बोजेष्वेव भाषितो भवति, विकार एनमार्या भाषन्ते शव इति, हम्मति सुराष्ट्रेषु, रंहति प्राच्यमध्येषु, गमिमेव त्वार्या प्रयुञ्जते, दातिर्लवनार्थे प्राच्येषु, दात्रमुदीच्येषु,... तस्मादाधुनिकभाषातोऽर्थबोधे आधुनिका शिष्टा एव प्रमाणम्, तद् व्यवहारत एव तत्तच्छब्देषु तत्तदर्थानां शक्तिग्रहो निश्चीयते ।

४.६ **त्रुटिविश्लेषणसिद्धान्तः** - प्रायोगिकभाषाविज्ञाने स्थितः सिद्धान्तोऽयं प्रयत्नविस्मरणाभ्यां भाषा शिक्ष्यत इति मनोवैज्ञानिकसिद्धान्तमादर्शं मनुते । गतिशीलायां भाषायामेव तादृश्यवस्था सम्भवतीत्यस्माद् भाषाया गतिशीलता ध्वन्यते ।

**४.७ भाषाया मूलस्रोतः कथ्यम्** - भाषाया मूलं कथ्यं तस्मादेव लेख्यरूपमागतमिति ब्लुमफिल्डादयः संरचनावादिन आमनन्ति । कथ्यभाषायां संरचनागतं वैभिन्यं सर्वत्र दृश्यत इति हेतोरेतत् कथनं भाषाया गतिशीलतां प्रमाणीकुरुते ।

**४.८ अप्रतिषेधसिद्धान्तः**- भाषाविज्ञानस्य रूपरेखा नामके पुस्तक उद्धृतोऽयं सिद्धान्तो भाषाया गतिशीलतां ज्ञापयति । भाषायां शब्द-वाक्यार्थध्वन्यादीनां अन्यत आगमनमन्यासु भाषासु गमनञ्च न प्रतिषिद्धम् । भाषायां नवनीताः शब्दाः समयप्रवाहेणोद्भवन्ति, अप्रचलिताश्च क्षयत्वं गच्छन्तीत्यप्रतिषेधसिद्धान्तेनापि भाषाया गतिशीलता ध्वन्यते ।

**४.९ वीचितरङ्गसिद्धान्तः** - भाषाविज्ञानस्य रूपरेखा नामके पुस्तके उद्धृतोऽयं सिद्धान्तः, वीच्यन्तरजनयित्रीं वीचिमिव भाषाप्युत्पादनशीला भवतीति द्योतयति, यथा वीच्यां शिलायां प्रक्षिप्तायां प्रथमत एका तस्या अन्यास्ताभ्योऽप्यन्या अनेका वीचय उद्भवन्ति तथैव भाषायामपि एकस्माच्छब्दादन्ये शब्दतरङ्गा जायन्त इति भाषायामुत्पादनशीलता प्रतीयते, सैवोत्पादनशीलता भाषाया गतिशीलतां सूचयति ।

**४.१० कालक्रमिकसिद्धान्तः** - भाषाविज्ञानस्य रूपरेखा नामके पुस्तके उद्धृतोऽयं सिद्धान्तो वैदिकी, पाणिनेः पूर्ववर्त्तिनी लौकिकी, पाणिनिकालिकी, तदुत्तरवर्त्तिनी, अधुनातनी च संस्कृतभाषा न समाना इति बोधयति, प्राचीनायां देवनागर्या लिप्यां स्थिता कतिपये वर्णा अधुना समाना न विद्यन्त इति एतादृशं परिवर्तनमपि भाषाया गतिशीलतां ध्वनयति ।

**४.११ वृक्षारेखसिद्धान्तः** एकस्मिन् वृक्षे यथैनेकाः शाखा भवन्ति तथैव भाषावृक्षेऽप्यनेका शाखारूपा भेदोपभेदा दृश्यन्त इत्यस्य मान्यता । तादृशभेदाश्च ध्वनि-शब्द-वर्णार्थ-रूपिम-वाक्यार्थेषु, संरचनादिषु च समये समये जायन्ते, भौगोलिककारणतः, राजनीतिक-सांस्कृतिकप्रभावतः, आवागमनकाठिन्यादिभिर्मूलभाषायामनेके भेदाः प्रादुर्भवन्ति, ते च स्वाभाविका इति भाषाविदां मतम् ।

**४.१२ रामाशीषपाण्डेयः** सारस्वतीसुषमापत्रिकायां (वर्ष ४४,अङ्कः ३४,सन् १९८९-९०) कालिदासस्य निरङ्कुशत्वमिति शीर्षभूते लेखे- महाकविना कालिदासेन नैजेष्वभिज्ञानशाकुन्तलनाटक-रघुवंश-महाकाव्यप्रभृतिषु कृतिष्वपाणिनीयं पदं प्रयुज्य स्वनिरङ्कुशत्वं साधितमिति समुल्लिलेख, यथा-लावण्यमुत्पाद्य

इवास यत्नः (अभि.५-२७), महाकविनात्रास पदस्य स्वतन्त्रप्रयोगः कृतः, तादृशाः प्रयोगा अन्यत्रापि दृश्यन्ते, यथा- तेनास लोकः पितृमान् विनेत्रा (रघु.१४-२३), तं पातयां प्रथममास पपात पश्चात् (रघु. ९-६१), प्रभ्रंशायां यो नहुषं चकार (रघु. १३-३६) । एतादृशा अपप्रयोगा एतस्मिन्नध्ययने आधाराः ।

**४.१३ देवस्वरूपमिश्रः** सारस्वतीसुषमापत्रिकायां (वर्ष-४९, अङ्क १-२, सन्-१९९४) अपभ्रंशशब्दानां साधुपूर्वकत्वविमर्श इति शीर्षकाख्ये लेखे ये येऽपभ्रंशाः शब्दाः सन्ति ते सर्वे साधुशब्देभ्य एव रूपान्तरिताः, तेषु यद्यपि पुण्यजनकता नास्ति तथापि तेषां प्रयोगनिवारणं दुःशक्यमित्याह, अत्र प्रस्तुतलेखोऽपि सहाय्यः ।

**४.१४ भवानीशङ्करभट्टराईः** शब्दशास्त्रीयव्याख्यानतत्त्वदृष्ट्याऽष्टाध्यायीशारदाप्रभाव्याख्यायाः समीक्षणमिति शीर्षभूते विद्यावारिधिशोधप्रबन्धे- भाषा गतिशीला भवतीति विषयकं नैरुक्तप्रमाणमुद्धरन् प्राह- पाणिनीयव्याकरणेऽप्यादिमध्यान्तलोपै नैकानि रूपाणि साधितानि, यथा-आदिलोपेऽपिनद्धः - पिनद्धः, अवगाहः- वगाहः, मध्यलोपे गम्-जग्मतुः (गमोऽलोपः),अन्त्यलोपे राजन्-राजेत्यादिः ।

एतादृशान् भाषिकप्रयोगानधिकृत्य अद्यावधि किमपि विशेषमध्ययनं न जातमिति हेतोः प्रस्तुतं समीक्षणमारभ्यते ।

## ५.विषयोत्थापनं विश्लेषणञ्च

वैदिककालतोऽद्यावधि बहवोऽसाधुशब्दाः प्रयोगपथमायाताः । वैदिकमन्त्रपर्यालोचकाः तत्रत्यानसाधुप्रयोगानार्ष इत्युक्त्वा शोधितवन्तः । उपनिषत्सु स्थिता भाषागता अशुद्धयोऽपि क्वचित् छन्दोवत्प्रयोग इत्युक्त्वा कतिषु रूपेषु यथोपयुक्तधातुप्रत्ययादीन् परिकल्प्यापि साधवः कृताः, एतावताऽद्यपर्यन्तमागच्छता भाषावाङ्मयादिषु लक्षशोऽसाधुरूपाणि प्रयुक्तानि, तानि प्रयोक्तृभिर्वैयाकरणैरन्यैश्च शोधितानि । तेषु कतिचिद् रूढीभूता अपि सन्ति । तादृशेभ्य उदाहरणेभ्यश्चात्र कानिचन प्रस्तूयन्ते ।

### ५.१ असाधुपदप्रयोगः

**क) काशिकाकारः सिद्धान्तकौमुदीकारश्च-** पृषोदरादीनि यथोपदिष्टम् (पा.सू.६-३-१०९) इति सूत्रं व्याख्यायन् पाणिनिमुनिनाऽदृष्टान् श्मशानम्, जीमूतः, सिंहः, हंसः, गूढोत्मा, पृषोदरम्, उलूखलम्, पिशाचः, मयूरः, अश्वत्थः, कपित्थः, कुञ्जरः, दूडाशः, दूणाशः, दक्षिणतारम्/दक्षिणतीरम्, दूढ्यः, बृसी, विश्रामः, प्रभृतीननेकान् शब्दान् सङ्कलय्य निपातनविपर्यासादिभिः साधुत्वं कुरुते ।

**ख) भट्टोजिदीक्षितः** (सिद्धान्तकौमुदीकारः) कालाट्ठञ् (पा.सू.४-३-११) इति सूत्रे कालशब्दात् ठञ्प्रत्ययेन कालिक इति रूपं साधयित्वा कालादीनप्रत्ययोऽसाधुरित्युद्घोषयन्- समकालीनं प्राक्कालीनमित्यपभ्रंशावित्याह ।

**ग) खेमराजखनालः** नेपालीशाकुन्तलमहाकाव्ये प्रयुक्तानां तत्समशब्दानां व्युत्पादनं प्रयोगपरीक्षणञ्चेति शीर्षकयुते विद्यावारिधिशोधप्रबन्धे नेपालीशाकुन्तलमहाकाव्ये तत्समरूपेण प्रयुक्तान् - कालीनः, विश्रामः, पूर्वीयः, विश्लेषितः, ध्वजा, गाना, आशः, निर्दयी, मलीन, विपद, व्याधा, शासना, शोचः, सृजनः, स्वप्ना, माणिकः, वसन्ती, स्वर्गिकः, हृद्व्योमी, चन्द्रछविः, घनमहिम, नागवेल्लिः, विचेतः, विपुलवक्षः, सृजनमाधुरी प्रभृतीनपाणिनीयशब्दानुदाहरति ।

**घ) नेत्रविनोदभट्टराईः** श्रीमद्भागवतस्थाव्ययपदानां पाणिनीयव्याकरणदृष्ट्याऽनुशीलनमिति शीर्षकयुते विद्यावारिधिशोधप्रबन्धे तत्रत्यानि - धीमहि (१-१-१), गृभीतगुणाम् (१०-८७-१४), ततद्रुहम् (१-१८-३७), मनो निर्विषयान् युङ्क्त्वा (२-१-१९), नेत्रे पिधाय्य (२-७-२९), स्वराज्ये स्थाप्य धर्मजम् (३-३-१६), प्रेक्षयित्वा (३-२३-४३), व्यवसीय (४-१२-३३), नोधा (३-२३-४७), चित्रधा (६-१४-५२), सन्त्यञ्जलौ किं पुरुधान्यपात्र्या (२-२-४) प्रभृतीन्यसाधुपदानि समुदाहरते । श्रीमद्भागवत एतद्विधानि नैकान्यसाधुपदानि यत्रतत्र दरीदृश्यन्ते ।

**ङ) श्रीमद्भगवद्गीतायां निबद्धे** यं ब्रह्मावरुणेन्द्ररुद्रमरुतः... इति मुक्तपद्ये स्तुन्वन्तीत्यशुद्धं पदं प्रयुक्तमस्ति ।

**च) बुधकौशिक**र्षिविरचिते रामरक्षास्तोत्रे रामाय रामभद्राय... इति पद्यमस्ति, तत्र सीताया पतये नमरित्यत्र पतय इत्यशुद्धं पदं प्रयुक्तमस्ति ।

**छ) मुण्डकोपनिषदि** प्राप्ते - सत्यमेव जयते नानृतं सत्येन पन्था विततो देवयान ... इति वाक्ये जयते इत्यशुद्धा क्रिया प्रयुक्ता वर्तते ।

**ज) समसामयिकं नेपालीव्याकरणम्** इत्याख्ये नेपालीव्याकरणग्रन्थे नेपालीभाषायां तत्समरूपेण प्रयुक्तानां तद्धितान्तसंस्कृतशब्दानामुल्लेखप्रसङ्गे तल्लेखको हेमाङ्गराजोऽधिकारी ठ-(नेपालीभाषायामिक)- छ-(ईय) -ख-(ईन) तसिल्-(तः) शस्-(शः) आलु-वत्प्रत्ययान्तानि पाणिनीयव्याकरणतः साधयितुमशक्यानि नैकानि रूपाण्युदाहरति, तत्र प्राप्ताः ठप्रत्ययान्ताः - चारित्रिकः, साम्प्रदायिकः, पारिश्रमिकः, आवधिकः, वैचारिकः, वैधानिकः, ऐच्छिकः, व्यवहारिकाश्चापाणिनीया दृश्यन्ते । तथैव छप्रत्ययान्ताः- ईश्वरीयः, वर्गीयः, गोत्रीयः, क्षेत्रीयः, पूर्वीयः, दिवसीयः, विद्युतीयः, भूमण्डलीयः प्रभृतयोऽप्यसाधवः सन्ति । तत्र निर्दिष्टाः खप्रत्ययान्ताः- प्राचीनः, कालीनः, युगीनः, रङ्गीनः शब्दा अप्यसाधव एव । तथैव-तसिल्प्रत्ययनिष्पन्नाः प्रथमतः, पूर्णतः, मूलतः, अंशतः, सामान्यतः, विशेषतः, साधारणतः, प्रत्यक्षतः, स्वभावतः, सामान्यतः, अनिवार्यतः प्रभृतयः शब्दा अपि पाणिनीयानुशासनतः साधयितुं न शक्यन्ते । अनेनैव प्रकारेण शस्प्रत्ययनिष्पन्नाः- शब्दशः, शतशः प्रभृतयोऽपि पाणिनीयनियमतो बहिर्दृश्यन्ते । तथैवालुच्प्रत्ययनिष्पन्नशब्दसूचौ प्रस्तुताः- ईर्ष्यालुः, मायालुः, शङ्कालुः, विषालुः सदृशाः शब्दा अप्यपाणिनीया एव । (अधिकारी,२०४९ : २१४-२१७)

**झ) शब्दरचना वर्णविन्यासश्च** नामके मोहनराजशर्मविरचिते नेपालीव्याकरणे प्रत्ययैः शब्दरचमिति शीर्षक इकप्रत्ययान्तसंस्कृततद्धितान् निरूपयन् शर्मवर्योऽयं शैक्षणिकः, ऐतिहासिकप्रभृतीन्, तसिल् प्रत्ययान्तान्- मूलतः, अंशत आदीन्, शस्प्रत्ययान्तान् शब्दशः प्रभृतीनसाधूनुल्लिलेख (शर्मा, २०६२ : १२०)

### ५.२ असाधुत्वसिद्धिः

पाणिनीये व्याकरणे ठ(ठक्,ठन्,ठञ्) नाम्ना नेपाल्याञ्चेकत्वेन प्रसिद्धोऽयं प्रत्ययः पाणिनीयानुशासने कालाट्ठञ्प्रभृतिभ्यश्चतुस्त्रिंशत्सङ्ख्यातोऽधिकेभ्यः सूत्रेभ्यो विधीयते । तत्र प्रायः प्रत्ययाः शत-कंस-लोक-सर्वलोक-पात्र-पारायणादिषु तादृशेष्वर्थेषु च केन्द्रिताः सन्ति । तेषु तेन क्रीतम् (पा.सू. ५-१-३७) इति सूत्रं तृतीयान्तात् क्रीतार्थे, तदस्य परिमाणम् (पा.सू.५-१-५७) इति प्रथमान्तात् परिमाणमित्यर्थे, तदर्हति (पा.सू.५-१-६३) इत्यर्हेऽर्थे, तमधीष्टो भृतो भूतो भावी (पा.सू. ५-१-८०) इति अध्ययने जीवनवृत्तौ भूते भविष्यति च कुरुते । एतादृशेष्वर्थेषु शाब्दिकेषु प्रत्ययेष्वपि-शैक्षणिकप्रभृतीन्युदाहरणानि नान्तभवन्तीति तान्य पाणिनीयान्येव । पाणिनीयव्याकरणे छप्रत्ययविधायकानि वृद्धाच्छः (पा.सू. ४-२-११४) प्रभृतीनि सप्तसूत्राणि सन्ति । तेषां नियमानुसारेण वृद्धसंज्ञकात् (शब्दारम्भ आ, ऐ, औ भूतात्), त्यदादिगण पठितेभ्यः, कम्बलात्, अनुप्रवचनात्, समापनात्, मित्रावरुणात्, भवच्छब्दात्, जिह्वामूलात्, अङ्गुलात्, गहादिगणपठितात्, पर्वतात्, स्व-पराभ्यां, आमीक्ष-पुरोडाशापूपेभ्यः, वर्गान्तात्, सर्वात्, माणवकात्, चारकात्, अङ्गारात्, प्रासादात्, परिखेयात्, पुत्राच्च छप्रत्ययो विधीयते । तद्धितान्तर्गतमिमं प्रत्ययमधिकृत्य नेपालीभाषायां बहवश्छान्ताः तत्समशब्दा निष्पन्ना निष्पादिताश्च सन्ति, परमत्र छप्रत्ययविधानस्य कतिचिद् नियमान् भङ्क्त्वाऽप्राप्तेऽपि स विहितो दृश्यते, यथा- ईश्वरीयः, वर्गीयः, गोत्रीयः, क्षेत्रीयः, कक्षीयः, पूर्वीयः, विद्युतीयः, भूमण्डलीयः, नेपालीयः, स्वर्गीयः, केन्द्रीयः, जलीयः, देशीयः, कृदन्तीयः, दिवसीयः, संसदीयः, स्तरीयः, विभागीयः, वित्तीयः, ध्रुवीयः, लेखकीयः, व्यवस्थापकीयः, प्रशासकीयः । एतेषु सर्वेषु वृद्धादित्वमपि नास्ति, अन्यानुशासनसङ्गतिरपि न दृश्यते । तथापि नेपालीभाषायां रूढभूता एते छान्तशब्दा तत्समत्वेन ख्याता वर्तन्ते परं पाणिनीयव्याकरणनियमे नान्तर्भवन्तीति तेऽसाधवो

मन्तव्याः । पाणिनीयानुशासनतोऽवृद्धेभ्योऽपि गहादिगणपठितेभ्यो गहान्तस्थ-सम-विषम-मध्य-मध्यन्दिनाङ्ग-वङ्ग-मगध-पूर्वपक्षापरपक्षाधमशाख-समानग्रामवाल्मीकिभ्यश्छप्रत्ययो विधीयते । तथैव गणसूत्रनियमाद् जन-पर-देव-स्व-वेणु-वेत्रेभ्यश्छप्रत्ययो विधीयते ।

पाणिनीयाष्टाध्याय्यां ख(ईन)प्रत्ययविधायकानि ग्रामाद्यखञौ प्रभृतीनि षोडशसूत्राणि सन्ति । तानि च प्रायः पारावार-ग्राम-युष्मदस्मद्-आत्म- विश्वजन- भोगोत्तरपद-मास-यथामुखाध्व-व्रत-सप्तपद प्रभृतिशब्दकेन्द्रितानि सन्ति । पाणिनीमनुशासनमत्र निर्धारितेभ्यः शब्देभ्य एवेनप्रत्ययं शास्ति । तेष्वपि प्राचीन-कालीन-युगीनादयो नान्तर्भवन्तीति पाणिनीयशासनदृष्टचाऽसाधून्येव । असाधुत्वेऽपि लोके कालीनमित्यस्य प्रयोगं दृष्टवता श्रीमता भट्टोजिदीक्षितेन कालाट्ठञ् (पा.सू. ४-३-११) इति सूत्रे समकालीनं प्राक्कालीनमेवैत अपभ्रंशा इत्याह ।

पाणिनीयव्याकरणानुसारेण पञ्चम्यास्तसिल् (पा.सू. ५-३-७) प्रभृतिभ्यः सूत्रेभ्य तः (तसिल्, अतसुजादयः) प्रत्ययो विधीयते । उक्तः प्रत्ययः पाणिनिना किं-सर्वादिगणपठित-बह्वादिभ्यः, अपादानार्थे विद्यमानेभ्यः प्रातिपदिकेभ्यः, अतिग्रहाऽव्यथनक्षेपादिभ्यः, षष्ठचर्थे विद्यमानेभ्यो व्याश्रयेऽर्थे, रोगादपनयनेऽर्थे व्यवस्थापितः । एतेषु नियमेषु सत्स्वपि नेपालीपरम्परायां संस्कृततद्धितान्तशब्दत्वेन सामान्यतः, विशेषतः, अंशतः, मूलतः, पूर्णतः, प्रथमतः, मुख्यतः, स्वभावतः, अनिवार्यतः, प्रत्यक्षतः, साधारणतः प्रभृतयः शब्दाः यत्रतत्र प्रयुक्ता दृश्यन्ते, तथा समानाकृतियुतानामपि ग्रहणात् स्वरतः, स्वतः, वर्णतः प्रभृतीन्यपि सिद्धचन्ति, तेषामुल्लेखं नेपालीवैयाकरणौ मोहनराजशर्म-हेमाङ्गराजौ कुरुतः । (शर्मा, २०६२ : १२० । अधिकारी, २०४९ : २१७) तौ रीतिवाचकसंस्कृततद्धितेष्वेतान् शब्दानुदाहरतः, लोको यत् किमपि कुर्यात् परं पाणिनीयदृष्टचा एतेऽसाधव एव मन्तव्याः ।

अष्टाध्यायास्तद्धितखण्डे शः(शस्)प्रत्ययविधायकानि त्रीणि सूत्राणि सन्ति, लोमादिपामादिपिच्छादि शनेलचः (पा.सू. ५-२-१००), बह्वल्पार्थाच्छस्कारकादन्यतरस्याम् (पा.सू. ५-४-४२), सङ्ख्यैकवचनाच्च वीप्सायाम् (पा.सू. ५-४-४३) । एषु लोमादिगणपठितेभ्यः (लोम-रोम-बभ्रु-हरि-गिरि-कर्क-कपि-मुनि-तरु), बहु-अल्प-एकार्थाभिधायिनः सङ्ख्यावाचकाच्च वीप्सायामर्थे शस्प्रत्ययो विधीयते । एतेषामुदाहरणानि लोमशः, रोमशः, बभ्रुशः..., बहुशः, अल्पशः, द्विशः, माषशः सन्ति । बह्वल्पार्थसूत्रे बह्वल्पबोधकयो रर्थयोर्ग्रहणाद् भूरिशः, स्तोकशः इत्यादीन्यपि भवन्ति । शेखरेऽन्यत्रापि- अक्षरशः, क्रमशः, प्रायशः, शब्दशश्च प्रयुक्ता दृश्यन्ते । एतानि रूपाणि पाणिनीयव्याकरणतो न सिद्धचन्तीति तान्यसाधूनि ।

एवमेव संस्कृततल्(ता) प्रत्ययस्य प्रयोगेऽपि लोकः नियमसरणीं सर्वत्र न पालयति । आचार्यपाणिनिः तस्य भावस्त्वतलौ (पा.सू. ५-१-११९) इति सूत्रेण भावे (प्रकृतिजन्यबोधे प्रकारो भावः/ शब्दस्य प्रवृत्तिनिमित्तं भावः, स एव जातिः) तल्प्रत्ययं साधयति । अतः कुटिलता, गम्भीरता, गोता, मधुरता, समञ्जसता, अलसताप्रभृतीनि भावबोधकानि रूपाणि सिद्धचन्ति । परं व्यवहारे गाम्भीर्यता, माधुर्यता, सामञ्जस्यता, आलस्यता, आतिथ्यता, बौद्धिकता, नैतिकता, सान्निध्यता, धैर्यता, प्राधान्यता, सामीप्यता, नैराश्यता, वैमनस्यता, सौन्दर्यता, औचित्यता, सौहार्दता, हार्दिकता, सामाजिकता प्रभृतीनि नैकानि रूपाणि तत्समनेपालीत्वेन प्रयुक्तानि प्राप्यन्ते । भावार्थे तल्-त्व-इक-ष्यञादीनां विधानानन्तरं तस्मिन्नेवार्थे पुनः प्रत्ययान्तरं विधातुमशक्यमिति पाणिनीयव्यवस्था । परं तादृशप्रयोगाणां लोकप्रचलनात् तानि चासाधुरूपाणीति मन्तव्यानि । तथैवेकप्रत्यये स्वत आदिवृद्धिसिद्धौ तस्याविधानेन व्यवहारिकतेति व्युत्पादनमप्यसाध्वेव । तथैव समसामयिके व्याकरणे स्थितं दृष्टिवानिति वत्प्रत्ययान्तं रूपमप्यसाध्वेव ।

पाणिनीयव्याकरणान्तर्गते कृदन्तप्रकरणे स्थितेन निष्ठा (पा.सू.३-२-१०२) इति सूत्रेण क्तक्तवतु प्रत्ययौ विधीयतः । तत्रेडागमे कृत इतान्तानि वितरित-पीडित-निर्देशित-पूजित-घटित-विदित-गुञ्जित-शासित-

जागरितप्रभृतीनि सेड्धातुनिष्पन्नानि रूपाणि सिद्ध्यन्ति । परं समसामयिके नेपालीव्याकरणे त्वेतप्रत्ययान्तं तद्धितान्तमित्युक्त्वा फलित-हर्षित-चर्चित-फलित-बाधित-निषेधित-लज्जित-खण्डितप्रभृतीनि धातुनिष्पन्नानि रूपाणि प्रस्तुतानि सन्ति, (अधिकारी, २०४९ : २१५) एतेषां समेषां रूपाणां साधुत्वेऽपि नेपालीवैयाकरणेन संस्कृततद्धितान्तशब्दपङ्क्तावेतेषामुपस्थापनमसाध्वेव । संस्कृततद्धिते तु तदस्य सञ्जातं तारकादिभ्य इतच् ( पा.सू. ५-२-३६) इत्येकेनैव सूत्रेणेतप्रत्ययो विधीयते । सूत्रमिदं तदस्य सञ्जातमित्यर्थे पण्डितः, फलितः, तारकितः, पुष्पितः, मुकुलितः, कण्टकितः, सुखितः, दुःखितः, विचारितः, तन्द्रितः, उत्कण्ठितः, रोमाञ्चितः, पुलकितः, मर्यादितः, कुण्ठितः सदृशानि पदानि साधयति । पाणिनीयानुशासने कृदन्ते स्थितेन स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच् (पा.सू. ३-२-१५८) इति सूत्रेण पूर्वोक्तेभ्यो धातुभ्य आलुच्प्रत्ययः क्रियते, अतः - स्पृहयालुः, गृहयालुः, पतयालुः, दयालुः, निद्रालुः, तन्द्रालुः, श्रद्धालु प्रभृतीनि रूपाणि सिद्ध्यन्ति । तद्धिते तु हृदयाच्चालुरन्यतरस्याम्, शीतोष्णतृप्रेभ्यस्तदसहने इत्यनयोर्नियमेन- हृदयालुः, शीतालुः, उष्णालुः प्रभृतीनि सिद्ध्यन्ति । परं लोके तु ईर्ष्यालुः, लज्जालुः, मायालुः, स्पर्धालुः, शङ्कालुः, विषालुः, कृपालुः प्रभृतीन्यपि प्रयुज्यन्ते । अत्र प्रस्तुतेषु ईर्ष्यालुप्रभृतिषु प्रथमद्वितीयौ ईर्ष्यां लातीति, लज्जेवास्तीति विग्रहे ईर्ष्या, लज्जेत्युपपदपूर्वकात् ला+डु इत्युणादिप्रक्रियया सिद्ध्यतीति शब्दकल्पद्रुमः कोशः सङ्केतयति । तत्त्वबोधिनीकारस्तु कृपालुस्पर्धालू अपि लज्जालुवत् डुप्रत्ययेन साधयतीति पाणिनीयदृष्ट्या तयोरप्यसाधुत्वं स्पष्टमेव ।

**६. असाधुशब्दप्रयोगविचारः**

आधुनिको लोको व्यवहारे, भोजने, भ्रमणे, मनोरञ्जने, भाषाप्रयोगे च स्वातन्त्र्यमिच्छति । अतो भाषान्तरतः/भिन्नभाषासम्पर्कतः स्वरूपनियमादीनां ग्रहणं, मर्यादाभङ्गः, मितव्ययिता, सादृश्यप्रभावः, सरलतायामाकर्षणञ्चाधुनिकानां भाषाप्रयोक्तॄणां वैशिष्ट्यम् । एतादृशानां वक्तृस्वभावानां प्रत्यक्षप्रभावः संस्कृतेऽपि वर्तत एव । अस्मादेव कारणादाधुनिका वक्तारोऽभिलषितेभ्यः शब्देभ्योऽभिलषितं प्रत्ययं कल्पयन्ति तं रूढीकुर्वन्ति च ।

भाषा जीविता अस्ति न वेति मापने तस्याः कथ्यप्रयोगः प्रमुखाधारः । यदि तस्या वक्तारः सन्ति चेत् तस्मात् प्राच्योदीच्यादयो भेदा अपि स्वतो जायन्त एव । तत्र प्राचीनमाध्यमिकाधुनिकादयः कालिकभेदा अप्युद्भवन्त्येव । एवंविधेन परीक्षणेनैव भाषायां जीवन्तता माप्यते । जीवितासु भाषासु शब्दार्थादीनामागमनं गमनञ्च प्रतिक्षणं सञ्चलति । कतिचित् शब्दा द्वितीयभाषात सादृश्यसम्पर्काभ्यां प्रयोगसारल्येन चागच्छन्ति, कठिनायामनुभूतायां वक्तृमुखादपगच्छन्त्यपि । सुद्ध्युपास्यः, सुद्ध्य्युपास्यः प्रभृतीनां रूपाणामुच्चारणाय काठिन्यमनुभूयैव सुध्युपास्य इत्यस्य प्रयोगो जात इत्यत्र प्रयोक्तॄणामौच्चा रणिकसारल्यमेव कारणम् । तथैव निकटवर्त्तिनां शब्दानां प्रभावोऽपि जीवितायां भाषायां दृश्यते, यथा-द्वादशशब्दसाहचर्यादेकादशस्योच्चारणम् । एकाधिक दशेति विग्रहे एकदश इति सम्भाव्येऽपि निकटसाहचर्यादेकादश इत्येव प्रयुज्यत इति साहचर्येणापि भाषा प्रभाविता भवतीति ज्ञायते । एकादशसदृशं रूपं दृष्ट्वैव व्याकरणमर्मज्ञैर्निपातनत आत्वं परिकल्प्यापि साधुत्वं कारितमित्यवधेयम् । यदि कस्यामपि भाषायां वैकल्पिकानि रूपाणि प्राप्यन्ते चेत् सापि गतिशीलेति मन्तव्या, संस्कृते-पृथिवी/पृथवी/पृथ्वी, बिन्दु/विन्दु, वीचि/वीची, कोटिः/कोटी, सरणी/सरणिः, विहङ्गः/विहङ्गमः, भुजङ्गः/ भुजङ्गमः प्रभृतीनि नैकानि वैकल्पिकरूपाणि यत्र तत्र दृश्यन्त इत्यस्या गतिशीलता प्रमाणिता भवति ।

व्याकरणशास्त्रं जागृधातोः क्तप्रत्ययेनेडागमेन गुणेन च जागरित इति रूपं साधयेत् परं लोकस्तु जागृत एव प्रयुङ्क्ते, तत्र सारल्यं/मुखसुखमेव कारणमिति वैयाकरणैरपि विचारणीयम् । अतो वैयाकरणात् प्रयोक्तारः श्रेष्ठतराः तेषामधीनं व्याकरणमित्यप्यवधेयम् । वक्तारो यां यां संरचनां प्रयुञ्जते तां तामेव सङ्कलय्य

वैयाकरणाः साधुत्वं कारयन्ति । ग्रन्थप्रणेतारोऽपि स्वकृतिषूपयुञ्जते । वैयाकरणाः सूत्रादीनां माध्यमेन परिनिष्ठितरूपसाधनाय यथाशक्यं प्रयतन्ते, तेभ्योऽधिकशब्दसङ्ग्रहलोभो तेभ्यो न प्राप्यते, भाषावाङ्मय-व्यवहारेषु प्रयुक्तानां शब्दानां निर्दुष्टत्वसाधनमेव तेषामुद्देश्यम्, येन केनापि स्यात् साधुः कार्य इति व्याकरणशास्त्रस्य लक्ष्यम् । भाषाविदान्तु मानकैः, क्षेत्रीयैः, कालिकैश्चान्यैरपि भेदैस्तथा सादृश्यसम्पर्क-मानकीकरणाधुनिकीकरणादिभिः स्याद्, येन केनापि स्याद् भाषिककोशवर्द्धनमुद्देश्यम् । तत्र जटिलाः शब्दाः फल्गुरिवापास्यन्ते, सरलाश्च मधुरफलवद् गृह्यन्ते । अपठितः पठितोऽपि लोकः शब्दोच्चारणकाले व्याकरणनियमानुल्लङ्घ्यापि वाग्व्यवहारमेव स्मरति, तेषां कृते व्यवहारसञ्चालनार्थमेव भाषाऽऽवश्यकी । अतो भाषिकाध्येतॄणां कृते व्याकरणं न प्राथमिकम् ।

पाणिनिकालतोऽद्यपर्यन्तमागच्छता संस्कृतेऽपि बहुविधानि परिवर्तनानि जातानि, कात्यायनकाले प्रवर्द्धितानि परिवर्तितानि च स्वरूपाणि तेन वार्तिकानि विरचय्य सङ्गृहीतानि, वार्तिकैरप्यगृहीतानि तु महाभाष्य-वार्तिकादिभिरन्यविधैर्नियमैश्चात्मसात्कृतानि । येभ्यो येभ्यः शब्देभ्योऽर्थबोधो जायते ते ते प्रयोगार्हा इति भाषाविदां मतम् । उपर्युल्लिखितेभ्यश्चारित्रिक-साम्प्रदायिकप्रभृतिभ्यः सर्वेभ्योऽर्थप्रतीतिर्जायत एव । नेपालीहिन्द्यादी अबुद्धेभ्य संस्कृतभाषिभ्योऽपि पूर्वोक्तेभ्यः शब्देभ्यो भाषिकसम्प्रेषणं जायत इति तेऽपि प्रयोगार्हाः । अतो वैयाकरणा यं किमपि वदेयुः, लोकेनानुमोदिता असाधवोऽपि शब्दाः ग्राह्या, यतो हि कालान्तरे जनिष्यमाणैर्वैयाकरणमूर्धन्यैर्वार्त्तिकानि, फक्किका, सूत्रं वापि रचयित्वा तादृशशब्दान् साधुकरिष्यन्त इति निश्चितम् । अथवा अधुनाऽनुमोदिता रूढीशब्दा इवैतेऽपि भविष्यति रूढित्वेन संस्कृत कोशभाण्डागारे सुरक्षिता भविष्यन्तीति एतेऽपि साधवो मन्तव्या इति निष्कर्षः ।

### ७. निष्कर्षः प्राप्तिश्च

प्राचीनकाले भाषिकाध्ययनापेक्षया व्याकरणप्रधानमध्ययनं चलति स्म, अतः शब्दानां यथासम्भवोपायेन साधुत्वसम्पादनं तेषां प्रयोगायोत्प्रेरणञ्च भवति स्म, परमधुना भाषाविदां दृष्टिर्भाषिकेऽध्ययने गता दृश्यते, अतो भाषिके प्रयोगे, वाङ्मये शास्त्रादौ चासाधुशब्दानां प्रयागो यत्र तत्र दरीदृश्यते । प्राचीना वैयाकरणा साधुशब्देन पुण्यमसाधुना पापञ्चेत्युक्त्वा शुद्धोच्चारणायाभिप्रेरयन्ति स्म, परमाधुनिकास्तु पापादप्यविभ्यन् लाघवं, मितव्ययञ्च शब्दमुच्चारयितुमिच्छन्ति, तथा कुर्वन्तीत्यसाधवो जाताः । प्राचीने कालेऽप्यसाधवः शब्दा प्रयुज्यन्ते स्म परं तदानीमार्षप्रयोग-वैकल्पिकप्रयोग-प्राच्योदीच्यादयो भेदा इत्याद्युक्त्वा तादृशशब्दाः साधुक्रियन्ते स्म । तेभ्योऽप्यवशिष्टास्तु रूढीभूता इत्युक्त्वा साध्यन्ते स्म । अधुनापि तत्कर्तुं शक्यते ।

प्रयोगे स्थितानामसाधुशब्दानां साधुत्वसम्पादनाय लेखोऽयं निम्नप्रस्तावान् पुरस्करोति-

१ येभ्यः शब्देभ्योऽर्थबोधो जायते, यस्योच्चारणात् प्रयोगाच्च बोद्धारः/भावका अर्थं गमयन्ति, ते सर्वे प्रयोगयोग्याः, भाषिकदृष्टचा तेऽपि साधवो मन्तव्याः ।

२ शुद्धाशुद्धिविचारो व्याकरणसम्बद्धो न तु भाषासम्बद्धः, भाषा तु वक्तारं भाषणायैवाभिप्रेरयति, भाषिका दृष्टिर्विस्तृता व्याकरणात्मिका दृष्टिस्तदपेक्षया सङ्कुचिता, अतः विस्तारदृष्टचा भाषिकमध्ययनं कार्यम् ।

३ प्रायोगिकभाषाविज्ञानस्य त्रुटिविश्लेषणसिद्धान्तो जीवितासु भाषास्वनेकास्त्रुटयो भेदाश्च भवन्ति तैरेव भाषा शिक्ष्यत इत्याह, तथैव कालक्रमिकवीचितरङ्गादयः सिद्धान्ता अपि भाषाया गतिशीलतां मापयन्ति, प्राच्यसंस्कृते आम्रगुप्तायनिः, ग्रामरक्षायणिः प्रयुज्यते चेदुदीच्ये त्वाम्रगुप्तिः, ग्रामरक्षिरिति हेतोर्भाषियमपि भेदवतीति निश्चीयते, तथैव पृथवि/पृथिवी/पृथ्वी, कुक्कुरः/कुकुरः, वाशिष्ठः/वासिष्ठः, स्थाली/स्थालं प्रभृतीनां ईषद्भिन्नानां स्वरूपाणां दर्शनात् संस्कृतेऽपि भाषिकभेदो यत्र तत्र आसीद्, वर्तते, वर्त्तिष्यत

चेति ज्ञायते । अष्टाध्याय्यां यत्र तत्रैव दृष्टा एतादृशा भेदाः प्राचीनाश्चेद् अधुना प्रयुज्यमाना अपाणिनीया शब्दास्त्वाधुनिकभेदा मन्तव्याः ।

४ भाषायाः प्रवृत्तिः सारल्यं लाघवेनोपायेन प्रयोगश्च, अत एव सत्यभामेति प्रयोक्तव्ये, भामैव, देवदत्त इति प्रयोक्तव्ये दत्त एव, जागरित इति प्रयोक्तव्ये च जागृत एव प्रयुज्यते, तथैव साहचर्यादशुद्धोऽपि एकादश शब्दः प्रयुज्यते । एतैरुदाहरणैर्भाषाप्रयोगे वाग्व्यवहारो मुख्यः, सम्प्रेषणेनैव भाषा जीवति, भेदोपभेदैश्च चिरंजीवतीति ज्ञायते ।

५ अधुना संस्कृतभाषा यद्यपि बहुत्र न व्यवह्रियते तथापि नेपालीहिन्दीमैथिलिभोजपुरिवङ्गप्रभृतिषु पञ्चाशदधिकासु भाषास्वियं प्रयोगमाध्यमेन वाङ्मय उपयोगमाध्यमेन जीविता वर्तत इति हेतो अस्या प्राणाधारभूता नेपालीप्रभृतिषु भाषासु तत्समरूपेण प्रयुक्ता अपाणिनीयशब्दा अप्युपायान्तरेण साधुकरणीया, निःसङ्कोचेन प्रयोज्या इति च लेखनिष्कर्षः ।

६ पाणिनीयव्याकरणेनासाधितानामालु-ठ-छ-ख-तसिल्-शस्-वतुप्रभृतिभिः प्रत्ययैर्निष्पन्नानामसाधुशब्दानां साधुत्वसम्पादनप्रयोजनाय समर्थनमस्य लेखस्योद्देश्यं सैव प्राप्तिश्च ।

## सन्दर्भसामग्रीसूची


अधिकारी, हेमाङ्गराज (२०४९), *समसामयिक नेपाली व्याकरण,* काठमाडौं : कुञ्जल प्रकाशन ।

खनालः, खेमराजः (२०७५), *शाकुन्तलमहाकाव्ये प्रयुक्ततत्समशब्दानां व्युत्पादनं प्रयोगपरीक्षणञ्च (विद्यावारिधेरप्रकाशितः शोधः), काठमाडौं : ने.सं.वि. ।*

चतुर्वेदी, रामाधीनः (इ.२००५), *संस्कृतभाषाविज्ञानम्,* वाराणसी : चौखम्बाविद्याभवन ।

दीक्षितः, भट्टोजिः (इ.२०१२), *वैयाकरणसिद्धान्तकौमुदी* (समासतद्धितखण्डः), दिल्ली : मोतीलाल बनारसीदास ।

नागेशः (इ.१९९८), *परमलघुमञ्जूषा* , वाराणसी : चौखम्बा सुरभारती प्रकाशन ।

न्यौपाने, टंकप्रसाद (२०५१), *भाषाविज्ञानको रूपरेखा,* धरान : धरान बुक डिपो ।

पतञ्जलिः (२०५२), *व्याकरणमहाभाष्यम्,* वाराणसी : चौखम्बा संस्कृतसंस्थान ।

पाणिनि, (इ.१९८७), *अष्टाध्यायी* (सम्पा. गोपालदत्तशास्त्री), (तृ.सं.), वाराणसी : चौ.सु.भा.प्र. ।

पाण्डेयः, रामाशीषः (१९८९), महाकविकालिदासस्य निरङ्कुशत्वम्, *सारस्वती सुषमा* , वर्ष-४४ (अङ्क-३४) वाराणसी : सम्पूर्णानन्द सं.वि. ।

पोखेल, केशवप्रसाद (२०७४), *प्रायोगिक भाषाविज्ञान,* काठमाडौं : क्याम्ब्रिज पब्लिकेसन ।

*भट्टराईः, नेत्रविनोदः (२०७६), श्रीमद्भागवतस्थाव्ययपदानां पाणिनीयव्याकरणदृष्ट्यानुशीलनम् (विद्यावारिधेरप्रकाशितः शोधः), काठमाडौं : ने.सं.वि. ।*

*भट्टराई, भवानीशङ्करः (२०७५), शब्दशास्त्रीयव्याख्यानतत्त्वदृष्ट्याऽष्टाध्यायीशारदाप्रभाव्याख्यायाः समीक्षणम् (विद्यावारिधेरप्रकाशितः शोधः), काठमाडौं :* ने.सं.वि. ।

भर्तृहरिः (इ.१९९०), *वाक्यपदीयम्* (ब्रह्मकाण्डम्), वाराणसी : चौखम्बाविद्याभवन ।

मिश्रः, देवस्वरूपः (इ.१९९४),अपभ्रंशशब्दानां साधुत्वपूर्वकविमर्शः, *सारस्वती सुषमा* वर्ष-४९, (अङ्क-१-२), वाराणसी : सम्पूर्णानन्द सं.वि. ।

वामनजयादित्यौ (१९६७) *काशिकावृत्तिः* (पञ्चमो भागः), वाराणसी : तारा पब्लिकेसन ।

शर्मा, मोहनराज (२०६२), *शब्दरचना र वर्णविन्यास,* काठमाडौं : नवीन प्रकाशन ।